## झोऽन्तः । (३/२१६९)

[1]प्रत्ययग्रहणमनुवर्तते, आदिग्रहणं निवृत्तम् । प्रत्ययावयवस्य झस्य[2] अन्त इत्ययमादेशो भवति । कुर्वन्ति । सुन्वन्ति । [3]चिन्वन्ति । 'अद्य श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै' (वासि.गृ. १३.२४) । 'जॄविशिभ्यां झच्' (उ.४१३) – जरन्तः । वेशन्तः । प्रत्ययस्य इत्येव, उज्झिता । उज्झितुम् । उज्झितव्यम् । [4]अस्मिन्नप्यन्तादेशे कृते प्रत्ययाद्युदात्त्वं भवति । तथा च झचः चित्करणमर्थवद् भवति ॥

## अदभ्यस्तात् । (४/२४७९)

अभ्यस्तादङ्गादुत्तरस्य झकारस्य[5] अत् इत्ययमादेशो भवति । ददति । ददतु । दधति । दधतु । जक्षति । जक्षतु । [6]जाग्रति । जाग्रतु । अन्तादेशापवादोऽयं[7] जुसादेशेन तु बाध्यते । अदधुः । अजागरुः[8] । [9]अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवति ॥

## आत्मनेपदेष्वनतः । (५/२२५८)

आत्मनेपदेषु यो झकारः, तस्य अनकारान्तात् अङ्गात् उत्तरस्य अत् इत्ययमादेशो भवति । चिन्वते[10] । चिन्वताम् । अचिन्वत । पुनते । लुनते । लुनताम् । अलुनत । आत्मनेपदेषु इति किम् ? चिन्वन्ति । लुनन्ति । अनतः इति किम् ? च्यवन्ते । प्लवन्ते । नित्यत्वादत्र विकरणे कृते [11]झोऽन्तादेशेन भवितव्यम् इत्यदादेशो न भवति । अनकारान्तेनाङ्गेन झकारविशेषणं किम् ? इह मा भूत्, 'अद्य श्वो[12] विजनिष्यमाणाः पतिभिः शयान्तै' (वासि.गृ. १३.२४) ॥

## शीङो रुट् । (६/२४४२)

शीङोऽङ्गादुत्तरस्य झादेशस्य अतः रुडागमो भवति । शेरते । शेरताम् । अशेरत । रुडयं परादिः क्रियते । स यदि झकारस्यैव स्याददादेशो न स्यादित्यत एवायमादेशस्यागमो विधीयते । [13]सानुबन्धग्रहणमयङ्लुगर्थम् । तेनेह न भवति, व्यतिशेश्यते ॥

## वेत्तेर्विभाषा । (७/२७०१)

वेत्तेरङ्गादुत्तरस्य झादेशस्य अतो विभाषा रुडागमो भवति । संविदते, संविद्रते । संविदताम्, संविद्रताम् । समविदत, समविद्रत । [14]वेत्तेः इति लुग्विकरणस्य ग्रहणं[15] किम् ? इह मा भूत्, विन्ते, विन्दाते, विन्दते [16]इति ॥

---

1. प्रत्यय इति अनुवर्तते इ. ई. 2. स्थाने इत्यधिकम् क. ड. इ. ई. 3. पुनन्ति इ. ई, मुष्णन्ति क. 4. अस्मिन्नादेशे ह. 5. स्थाने इत्यधिकम् क. इ. ड. ई. 6. जाग्रति नास्ति क. 7. योगः इत्यधिकम् क. 8. अजक्षुः इत्यधिकम् क. ड. इ. फ. ह. 9. अत्रापि नास्ति क. 10. चिनुताम् इत्यधिकम् क. 11. झोऽन्त नास्ति क. 12. वा इत्यधिकम् क. इ. 13. वाक्यमिदं नास्ति ब. क. ड, शीङ इति अनुबन्धनिर्देशः यङ्लुग्नि-वृत्त्यर्थः इ. ह. 14. वित्तेः क. ड, विन्देः ह. 15. संविदर्थम् ड. 16. इति नास्ति क.